# टिळक महाराष्ट्र विद्यापीठ, पुणे

**EB**

## संस्कृत विशारद (बी. ए.)– बहि:स्थ

**परीक्षा : मे – २०२४**

**सत्र ५ वे**

**विषय: विश्वगुणादर्शचम्पू (EB-४५१०)**

| दिनांक: २८/०५/२०२४ | गुण : ८० | वेळ : दु. २.०० ते दु. ५.०० |
|---|---|---|

सुचना: उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१. अधोलिखितेषु केषामपि त्रयाणाम् अनुवादं कुरूत।** (२४)

१. भागीरथीं यः पटुधीरुपास्ते यथाक्रतुन्यायत एव धन्यः।
देवत्वमेत्य त्रिदिवे सुधायां भागीरथीति व्यपदेशमेति।।

२. विविधदुरितव्रातस्फीतास्थिरव्यसनाकुलाददतिमितमतेर्जीवादेवाभिदां परमेशितुः।
अपबतपरिच्छेदामोदाम्बुधेरुपगच्छतां मशकशिशुतोऽभेदो न स्यात्कुतो मदहस्तिनः।।

३. सा सर्वतोमुखवती तटिनी सरागां मूर्तिर्विधेरिव बिभर्ति सरस्वतीं च ।
भेदास्त्वियान् बलिभिदश्चरणारविन्दादाद्या बभूव चरमा किल नाभिपद्मात् ।।

४. आशापालेषु पाशायुधयमबलभिन्मारुतेशादिकेषु प्रायो भूयस्सु जाग्रत्स्वपि च शुचितया भासुरा भूसुराधाः ।
यस्मै कालत्रयेऽपि प्रतिदिवसममी कुर्वतेऽर्घ्यप्रदानं सैषा त्रय्येव विद्या तपति रविमयी सर्वलोकान् पुनाना ।।

५. लीलालोलतमां रमामगणयन्नीलामनालोकयन्मुञ्चन् किंच महीमहीश्वरमयं मञ्चं हठाद्वञ्चयन् ।
आकर्षन् द्विजराजमप्यातिजवाद् हा हन्त लोकान्तराद्गोमुं शौरिरुरित्वरत्वर उदैद्ग्राहग्रहार्तं गजम् ।।

**प्र.२. वाक्यत्रयं ससन्दर्भं स्पष्टीकुरुत ।** (२४)

१. दातृत्वमेतस्य तवैव हृद्यम्।

२. अमी खलु प्रामाणिकार्थं दूरीकृत्याप्रामाणिकमर्थमुररीकुर्वन्ति ।

३. संसारे तदपि भ्रमेम यदि किं कुर्वीत सर्वेश्वरः।

४. मशकशिशुतोऽभेदो न स्यात्कुतो मदहस्तिनः?

५. लक्ष्मीपतिं तमपि मार्गणयांचकार ।

**प्र.३.** काञ्चीपुरीमधिकृत्य निबन्धं लिखत। **अथवा** सूर्यवर्णनमधिकृत्य सविस्तरं लिखत । (१६)

**प्र.४. टिप्पण्यौ (२) लिखत।** (१६)

१. तार्किकवर्णनम्

२. गंगानदीवर्णनम्

३. ज्यौतिषकवर्णनम्

--------------